धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥
अस्मिन् महामोहमये कटाहे
सूर्य्याग्निना रात्रिदिवेन्धनेन ।
मासर्त्तुदर्व्वीपरिघट्टनेन
भूतानि कालः पचतीति वार्त्ता" ॥

इति मुद्राङ्कितमहाभारते वनपर्व्वणि ३१२ अध्यायः ॥ अपि च ।
"देवानामनृणी जन्तुर्यज्ञैर्भवति मानवः" ।
इत्यादि शुद्धतत्त्वं ।

अनृतं, क्ली, (न ऋतं नञ्समासः ।) कृषिः । मिथ्या । इत्यमरः ॥ विवाहादिपञ्चकेष्वनृतं न पापजनकं । यथा,—

"विवाहकाले रतिसंप्रयोगे
प्राणात्यये सर्व्वधनापहारे ।
विप्रस्य चार्थे ह्यनृतं वदेत
पञ्चानृतान्याहुरपातकानि" ॥

इति महाभारते कर्णपर्व्वणि अर्जुनं प्रति श्रीकृष्णवचनं ॥

अनेकं, त्रि, (एकस्मात् अन्यत् नञ्समासः ।) एकत्वातिरिक्तसंख्यानं तद्विशिष्टञ्च । बहु । यथा,—
"अनेकराजन्यरथाश्वसङ्कुलं" ।
इति भारविः ॥

अनेकजः, पुं, (अनेकं जायते, अनेक + जन् + डः उपपदसमासः ।) पक्षी । इति त्रिकाण्डशेषः ॥ बहुजाते त्रि ॥

अनेकधा, व्य, (अनेक + प्रकारार्थे धा ।) अनेकप्रकारं । बहुधा । यथा,—
"पाटीसूत्रोपमं वीजं गूढमित्यवभासते ।
नास्ति गूढमगूढानां नैव षोढ़ेत्यनेकधा" ॥
इति लीलावती ॥ अनेकवारार्थेऽपि क्वचित्प्रयोगः ॥

अनेकपः, पुं, (अनेकाभ्यां मुखशुण्डाभ्यां पिवति, अनेक + पा + कः, उपपदसमासः ।) हस्ती इत्यमरः ॥

अनेकाश्रितगुणः, पुं, (अनेकानि आश्रितः, द्वितीयाश्रितातीत इत्यादिना समासः, तादृशः गुणः कर्म्मधारयः ।) बहुनिष्ठगुणः । तद्यथा । संयोगः १ विभागः २ द्विपृथक्त्वादिः ३ एकत्वान्यसङ्ख्या ४ । इति सिद्धान्तमुक्तावली ॥
("संयोगश्च वियोगश्च सङ्ख्या द्वित्वादिकास्तथा ।
द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः" ।
इति भाषापरिच्छेदे ।)

अनेडमूकः, त्रि, (नास्ति एडः वधिरः मूकः वाक्शक्तिरहितश्च यस्मात् सः ।) धूर्त्तः । शठः । श्रुतिवाग्विहीनः । इति मेदिनी ॥ काला वोवा इति भाषा ।

अनेहाः, [स्] पुं, (न हन्यते, न + हन् + असुन् पृषोदरादित्वात् हन् स्थाने एहादेशः, ततः सौत्वे अनङादेशः ।) कालः । समयः । इत्यमरः ॥
("तस्थुस्तस्यान्तिके द्रोहभिक्षादानेहःप्रतीक्षिणः" ।
इति राजतरङ्गिणी ।)

अनैक्यं, क्ली, (न एक भावे ष्यञ् ।) ऐक्याभावः । अनेकता । एकस्य भावः ऐक्यं पश्चान्नञ्समासः ॥

अनो, व्य, (न नी डो) निषेधार्थः । अभावः । इत्यमरटीकायां नीलकण्ठः ॥

अनोकहः, पुं, (अनसः शकटस्य अकं गमनं षष्ठीतत्, तत् हन्ति अनोक + हन् + डः ।) वृक्षः । इत्यमरः ॥
("पृक्तस्तुषारैर्गिरिनिर्झराणा-
मनोकहाकम्पितपुष्पगन्धी" ।
इति रघुवंशे ।)

अन्च उ गतिपूजनयोः । इति मुग्धबोधे वोपदेवः ॥

अन्च उ पूजने । गमने । श्लिष्टोक्तौ । इति कविकल्पद्रुमः ॥ उ अञ्चित्वा अक्त्वा । श्लिष्टोक्तिरव्यक्तशब्दः । इति दुर्गादासः ॥

अन्च क व्यक्तौ । इति कविकल्पद्रुमः ॥ व्यक्तिरिह विशेषणं । क अञ्चयति बुद्धिं सुधीः । विशिनष्टीत्यर्थः । इति दुर्गादासः ॥

अन्ज उ ध ञि व्यक्तौ । गतौ । म्रक्षणे । इति कविकल्पद्रुमः ॥ उ अञ्जिष्यति अङ्क्ष्यति । ध अनक्ति । ञि अक्तोऽस्ति । व्यक्तिः स्फुटीकरणं ।
"शरीरभाजां भवदीयदर्शनं
व्यनक्ति कालत्रितयेऽपि योग्यतां" ।
इति माघः ॥ अनक्ति गात्रं तैलेन जनः । इति दुर्गादासः ॥

अन्तं, क्ली, (अम् + तन् ।) स्वरूपं । स्वभावः । इति मेदिनी त्रिकाण्डशेषश्च ॥

अन्तं, क्ली, पुं, (अम् + तन् ।) शेषः । इति मेदिनी ॥ तत्पर्य्यायः । जघन्यं २ चरमं ३ अन्त्यं ४ पाश्चात्यं ५ पश्चिमं ६ । इत्यमरः ॥

अन्तः, पुं, (अम् + तन् ।) नाशः । इत्यमरः ॥ स्वरूपः । प्रान्तः । सीमा । निश्चयः । अवयवः । इति हेमचन्द्रः ॥

अन्तः, त्रि, (अम् + तन् ।) अन्तिकः । निकटः । इति मेदिनी ॥ अतिमनोहरः । इति विश्वः ॥

अन्तःकरणं, क्ली, (अन्तर्मध्यवर्त्ति करणं ज्ञानसाधनं, कर्म्मधारयः, कृ + करणे ल्युट् ।) अन्तरिन्द्रियं । धीन्द्रियं । तत्पर्य्यायः । मनः २ निगुः २ । इति त्रिकाण्डशेषः ॥ अस्य कार्य्यभेदान्नामचतुष्टयं, यथा,—
"मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरं ।
संशयो निश्चयो गर्व्वः स्मरणं विषया अमी" ॥
इति वेदान्तः ॥ (अस्योत्पत्तिर्यथा,—"मिलितैस्तु तैः अन्तःकरणमेकं स्यात्" इति । तैः पञ्च तत्त्व-सत्त्वांशैर्मिलितैः अन्तःकरणं भवतीत्यर्थः ।
"धनुर्भृतोऽप्यस्य दयार्द्रभाव-
माख्यातमन्तःकरणैर्विशङ्कैः" ।
इति रघुवंशे ।)

अन्तःकुटिलः, पुं, (अन्तरभ्यन्तरे कुटिलः वक्रः ।) शङ्खः । इति राजनिर्घण्टः ॥ कुटिलान्तःकरणे त्रि ॥

अन्तःपुरं, क्ली, (अन्तर्मध्यवर्त्ति पुरं गृहं, कर्म्मधारयः ।) राज्ञः स्त्रीगृहं । तत्पर्य्यायः । अवरोधनं २ अवरोधः ३ शुद्धान्तः ४ । इत्यमरः ॥ अन्तःपुरादयो राजदारेष्वपि तात्स्थ्यात् वर्त्तन्ते । यथा । "शुद्धान्तसम्भोगनितान्ततुष्टे" । इति नैषधम् । इति भरतः ॥ "दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा" । इत्यभिज्ञानशकुन्तलम् ॥

अन्तःपुराध्यक्षः, पुं, (अन्तःपुरस्य अध्यक्षः रक्षकः, षष्ठीतत्पुरुषः ।) राज्ञामन्तःपुररक्षकः । तल्लक्षणं यथा,—
"वृद्धः कुलोद्गतः शक्तः पितृपैतामहः शुचिः ।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते" ॥
इति युक्तिकल्पतरुः ॥

अन्तःसत्वा, स्त्री, (अन्तर्मध्ये सत्त्वं प्राणी सारो वा यस्याः सा, स्त्रियां टाप् ।) भल्लातकः । इति शब्दचन्द्रिका ॥ गर्भवती । अन्तरुदरमध्ये सत्त्वं प्राणी यस्याः सा ॥

अन्तःस्वेदः, पुं, (अन्तः मध्ये स्वेदः मदजलं यस्य सः ।) हस्ती । इति त्रिकाण्डशेषः ॥

अन्तकः, पुं, (अन्तं विनाशं करोति, अन्त + करोत्यर्थे णिच् ततो ण्वुल् ।) यमः । इत्यमरः ।
("ऋषिप्रभावात् मयि नान्तकोऽपि प्रभुः प्रहर्त्तुं किमुतान्यहिंस्राः" । इति रघुवंशे ।)

अन्तगः, त्रि, (अन्तं पारं गच्छति, अन्त + गम् + डः, उपपदसमासः ।) अन्तगामी । पारगः । यथा,
"वेदान्तगो ब्राह्मणः स्यात् क्षत्त्रियो विजयी भवेत्"
इति महाभारते विष्णुसहस्रनामफलं ॥ मृतः । अन्तं नाशं गच्छतीति ॥

अन्ततः, [स्] व्य, (अन्त + तस् ।) सम्भावना । अवयवः । पञ्चम्यर्थे । शासनं । इति विश्वः ॥ (शेषादारभ्य । प्रान्तभागेन । अग्रभागेन ।
"वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरन्ततः"
इति मनुः ।)

अन्तर्, व्य, (अम् + अरन् तुडागमश्च ।) मध्यं । प्रान्तं । स्वीकारः । इति विश्वः ॥

अन्तरं, क्ली, (अन्तं राति ददाति, अन्त + रा + कः, उपपदसमासः ।) अवकाशः । अवधिः । परिधानं । अन्तर्धानं । भेदः । तादर्थ्यं । अवसरः । मध्यं । अन्तरात्मा । छिद्रं । आत्मीयः । विना । वहिः । इत्यमरः ॥ सदृशः । इति तट्टीका मेदिनी च ॥*॥ अवकाशे यथा । "मृणालसूत्रान्तरमप्यलभ्यं" । इति कुमारसम्भवे ॥ अवधौ यथा । "निरन्तराभ्यन्तरवर्त्तिषु" ॥ परिधाने यथा । अन्तरे शाटकाः परिधानीया इत्यर्थः ॥ अन्तर्द्धौ यथा, "पर्व्वतान्तरितो रविः" ॥ भेदे यथा,—
"यदन्तरं सर्षपशैलराजयो-
र्यदन्तरं वायसवैनतेययोः" ।
इति रामायणं ॥ तादर्थ्ये यथा । त्वामन्तरेण कृतं गृहीतं त्वदर्थमित्यर्थः ॥ छिद्रे यथा । "प्रहरेदन्तरे रिपुं" ॥ आत्मीये यथा । "अयमत्यन्तरो मम" ॥ विनार्थे यथा । "हरे त्वदालोकनमन्तरेण" ॥ वहिरर्थे यथा । अन्तरे चण्डालगृहा वा ग्रामा इत्यर्थः ॥ अवसरे यथा । "अथान्तरे च कुलटा कुलवर्त्मपातेत्यादि" ॥ मध्ये यथा । "आवयोरन्तरे जाताः पर्व्वताः सरितो द्रुमाः" ॥ सदृशे

53